# Shri Kingrihesha Stutih

# શ્રીકિઙ્ગૃહેશસ્તુતિઃ

## Document Information

```
Text title : kiNgRRiheshastutiH
File name : kiNgRRiheshastutiH.itx
Category : vishhnu
Location : doc_vishhnu
Author : veNkaTeshakavi
Description/comments : Thiruvallur Veeraraghava Swamy Veerarghavaswamy
Latest update : October 3, 2021
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 19, 2022

*sanskritdocuments.org*

# શ્રીકિઙ્ગૃહેશસ્તુતિઃ

અયત્નસઙ્કલ્પિતસર્વલોક-
    સર્ગાપવર્ગસ્થિતિસંવિધાનમ્ ।
અનાદિમધ્યાન્તમશેષનાથં
    કિઙ્ગેહનાથં શરણં ભજામિ ॥ ૧॥

અકૃત્રિમાનાં વચસામભૂમિં
    અગોચરં બ્રહ્મશિવાદિવાચામ્ ।
અહં સ્તુવે કિઙ્ગૃહનાયક ત્વાં
    તથાપ્યલજ્જંસ્તુ મિતં પચોક્તિઃ ॥ ૨॥

અકિઞ્ચનોઽનન્યગતિસ્ત્વદીય
    સ્તુતિં કરોમીતિ મતિં કરોમિ ।
કૃપાનિધે કિઙ્ગૃહનાયકાદ્ય
    ત્વમેવ મે વાચમુદીરયેથાઃ ॥ ૩॥

ત્વયૈવ દત્તામુપલભ્ય વાણીં
    અણીયસીમપ્યતુલપ્રભાવમ્ ।
પ્રસાદયે કિઙ્ગૃહનાયક ત્વાં
    ન ચેત્ કુતો મે સફલં વચસ્સ્યાત્ ॥ ૪॥

અનેન જીવેન સમસ્તવસ્તુ
    પ્રવિશ્ય નામાનિ ચ રૂપભેદૈઃ ।
વ્યાકૃત્ય વીક્ષાવનમધ્યભાગે
    વિભું શયાનં સતતં ભજામિ ॥ ૫॥

અશેષપુંસાં હૃદિ સન્નિવિષ્ટં
    અનલ્પશક્ત્યાદિ ગુણૈર્વિશિષ્ટમ્ ।
હૃત્તાપ હૃત્પઙ્કજ ભૃઙ્ગજુષ્ટં
    દેવં ભજે કિઙ્ગૃહગં મમેષ્ટમ્ ॥ ૬॥

શ્રીશાલિહોત્રાર્પિતશાલિપિષ્ટ
    હૃષ્ટો ભવાન્ દેવશયિષ્ણુરેનમ્ ।
કિં ગેહમત્રેતિ યદાવદત્ તત્
    કિઙ્ગેહમાસીત્ તવ સદ્મ નામ્ના ॥ ૭॥

પદ્મામહીલાલિતપાદપદ્મં
    પદ્માસનાધિષ્ઠિતનિમ્નનાભિમ્ ।
શયાનમાક્રમ્ય ભુજઙ્ગતલ્પં
    કિઙ્ગેહસદ્માનમહં નતોઽસ્મિ ॥ ૮॥

વિસ્મેરમાસીત્ ભુવનં ત્વદીયં
    ચરિત્ર મન્વીક્ષ્ય ચિરપ્રવૃત્તમ્ ।
કિઙ્ગેહનાથાસુરકૈટભાદિ
    નિબર્હણાર્થં કિલ સર્વશક્તે ॥ ૯॥

ગઙ્ગાદિતીર્થાનિ નિષેવ્યશંભુઃ
    સર્વાણિ પુણ્યાયતનાનિ ગત્વા ।
અમુક્તપૂર્વોવિધિહત્યયા ત્વાં
    સંસેવ્ય કિઙ્ગેહપતે વિમુક્તઃ ॥ ૧૦॥ (કિં સેવ્ય કિઙ્ગેહપદે)

અજહ્નુજાનોદ્ય મહાપરાધં
    દ્વિજં હિ હૃત્તાપહરં સરસ્તે ।
અતીતરત્ કૌશિકમદ્ભુતં ત્વત્
    પ્રભાવતઃ કિઙ્ગૃહનાથ નૈતત્ ॥ ૧૧॥

રઘુપ્રવીરસ્ય તવાર્હમેતત્
    યથાગતસ્યૈવ સિપોર્જિઘાંસોઃ ।
વિધૂય રક્ષસ્ત્વમમુષ્ય દિવ્યં
    અદાઃ પદં કિઙ્ગૃહનાયક ત્વમ્ ॥ ૧૨॥

પિષ્ટપ્રદીપાન્ પરિકલ્પ્ય યે ત્વાં
    હૃષ્ટા ભજન્તેઽહનિપુષ્યદર્શે ।
ઇષ્ટપ્રદાયી વિતનોષિ તેષાં
    કષ્ટોપભોગ્યાન્યપિ કાઙ્ક્ષિતાનિ ॥ ૧૩॥

વિકાસયન્ માનસપઙ્કજાનિ

વિપશ્ચિતાં નિશ્ચલભક્તિભાજામ્ ।
પ્રાદુર્ભવન્નાસુરકૈટભાદિ
તમોરવેત્વં મયિ સુપ્રસીદ ॥ ૧૪॥

પ્રદ્યુમ્નનામ્ને તપસાં હિ ધામ્ને
કૃપાપ્રસન્ને ત્વયિ કિઙ્ગૃહેશ ।
ગઙ્ગાધિકત્વં ન કિમાપતીર્થં
હૃત્તાપહં વા તનયં ન વન્ધ્યા ॥ ૧૫॥

ત્વં સર્વવિત્ ત્વં કમલાસહાયઃ
ત્વમેવ વેદાન્ત વચોઽવસેયઃ ।
ભવન્તમેતં શરણં પ્રપન્નાઃ
વયં ન યસ્માત્ પરમસ્તિ દૈવમ્ ॥ ૧૬॥

પુરાણપુંભાવમહો વિગુહ્ય (વિગૃહ્ય)
યુવત્વમેવાકલયન્ સુરૂપમ્ ।
ઉપાયમસ્ત્વં કિલ ધર્મસેન-
સુતાન્નતાઙ્ગીમિહ કિઙ્ગૃહેશ ॥ ૧૭॥

શ્રીભૂમિલાલિતપદં શ્રિતશેષતલ્પં
કલ્પાન્તયોગ્યભુવનાવનયોગનિદ્રમ્ ।
શ્રીશાલિહોત્રશિરસાધૃતહસ્તપદ્મં
શ્રીવીરરાઘવવિભું શ્રયતાં મનો મે ॥ ૧૮॥

વેઙ્કટેશકવિના વિનિર્મિતાં
કિઙ્ગૃહાધિપતિ સંસ્તુતિં પઠન્ ।
દિવ્યભોગમુપભુજ્ય માનવો
ભવ્યરૂપમવલોકયેત્ પ્રભોઃ ॥ ૧૯॥

ઇતિ વેઙ્કટેશકવિના વિરચિતા શ્રીકિઙ્ગૃહેશસ્તુતિઃ સમાપ્તા ।

*Shri Kingrihesha Stutih*

pdf was typeset on February 19, 2022

Please send corrections to *sanskrit@cheerful.com*